# Shrirama Stotram Padyatmaka

# શ્રીરામસ્તોત્રમ્ પદ્યાત્મક

## Document Information

Text title : Shrirama Stotram Padyatmaka

File name : rAmastotrampadyAtmaka.itx

Category : raama, vAsudevAnanda-sarasvatI

Location : doc_raama

Author : vAsudevAnandasarasvatI TembesvAmi

Description-comments : From stotrAdisangraha

Latest update : May 12, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 22, 2022

*sanskritdocuments.org*

# શ્રીરામસ્તોત્રમ્ પદ્યાત્મક

રામમાશ્રય રામમાશ્રય રામમાશ્રય ભદ્રદમ્ ।
રામમાશ્રયતાં કુતોઽપિ ભવેત્કુદૈવમભદ્રદમ્ ॥ ધ્રુ.॥

યસ્ય પાદસરોજલગ્નરજઃકણાદપિ તત્ક્ષણમ્ ।
ગૌતમર્ષિવધૂદ્ધૃતિઃ કિલ યત્કટાક્ષનિરીક્ષણમ્ ॥

આરવીન્દુ બિભીષણાય સુરાજ્યમર્પયદાશુ તમ્ ।
ચિત્ત ચિન્તય વિશ્રુતં ન ચ હન્તિ કોઽપિ યદાશ્રિતમ્ ॥ ૧॥

માયયાપિ યદાશ્રિતસ્ત્વિહ કોઽપિ નો પરિભૂયતે ।
રામમાર્તિવિરામમાશ્રય કં યતો હ્યનુભૂયતે ॥

યસ્ય નામવશાચ્છિલા અપિ સિન્ધુના હિ સમુદ્ધૃતાઃ ।
તે જડા અજડા ભવન્તિ ન કિં વદાઽત્ર સમુદ્ધૃતાઃ ॥ ૨॥

સર્વદૈવતકિંશરોઽખિલશઙ્કરોઽપિ હિ શઙ્કરો ।
યસ્ય નામ વિમુક્તિધામ જપત્યકામહિતાદરઃ ॥

વાસુદેવસરસ્વતી યમગાયતાખિલકામદમ્ ।
રામમાશ્રય તં સતાં મતમાશુ શાશ્વતધામદમ્ ॥ ૩॥

ઇતિ શ્રીવાસુદેવાનન્દસરસ્વતીવિરચિતા શ્રીરામસ્તુતિઃ સમાપ્તા ।

*Shrirama Stotram Padyatmaka*
pdf was typeset on November 22, 2022

Please send corrections to *sanskrit@cheerful.com*